## क्तेन च पूजायाम्। (१२/७०६)

'मतिबुद्धिपूजार्थेभ्यश्च' (३.२.१८८/३०८९) इति वक्ष्यति, तस्येदं ग्रहणम्। पूजाग्रहणमुपलक्षणार्थम्। क्तो यः पूजायां विहितस्तेन षष्ठी न समस्यते। [1]राज्ञां मतः। राज्ञां बुद्धः। राज्ञां पूजितः। पूजायाम् इति किम्? छात्रस्य हसितम् छात्रहसितम्॥

## अधिकरणवाचिना च। (१३/७०७)

'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (३.४.७६/३०८७) इति वक्ष्यति, तस्येदं ग्रहणम्। अधिकरण[2]वाचिना क्तेन[3] षष्ठी न समस्यते। [4]इदमेषां [5]यातम्। इदमेषां भुक्तम्[6]॥

## कर्मणि च। (१४/७०८)

क्तेन इति निवृत्तम्। कर्मग्रहणं षष्ठीविशेषणम्। कर्मणि च या षष्ठी सा न समस्यते। 'उभयप्राप्तौ कर्मणि' (२.३.६६/६२४) इति[7] षष्ठ्या इदं ग्रहणम्। आश्चर्यो गवां दोहोऽ[8]गोपालकेन। रोचते[9] ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं [10]देवदत्तेन। विचित्रा[11] सूत्रस्य कृतिः पाणिनिना[12]॥

## तृजकाभ्यां कर्तरि। (१५/७०९)

कर्तृग्रहणं षष्ठीविशेषणम्। कर्तरि या षष्ठी सा तृचा अकेन च [13]सह न समस्यते। भवतः शायिका। भवत [14]आसिका। भवतोऽग्रगामिका (३.३.१११/३२८८)। तृच् कर्तर्येव विधीयते, तत्प्रयोगे कर्तरि षष्ठी नास्ति। तस्मात् तृज्-ग्रहणमुत्तरार्थम्। कर्तरि इति किम्? इक्षुभक्षिकां मे [15]धारयसि॥

## कर्तरि च। (१६/७१०)

कर्तरि च यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते। सामर्थ्यादकस्य [16]विशेषणार्थं कर्तृग्रहणम्, [17]इतरत्र व्यभिचाराभावात्। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। ननु [18]च भर्तृशब्दो ह्ययं[19] याजकादिषु पठ्यते? सम्बन्धिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम्। [20]अकः खल्वपि—ओदनस्य भोजकः। सक्तूनां [21]पायकः (७.३.३३/२७६१)॥

---

1. राज्ञां बुद्धः—हसितम् नास्ति फ, पूजायां—हसितम् नास्ति ह. 2. °वाचिनां च क. 3. सह इत्यधिकम् फ. 4. इदमेषामासितम् इत्यधिकम् क.फ. 5. पानम् ब, गतम् ड. 6. इदमेषामपक्रान्तम् इत्यधिकम् फ. 7. अस्याः इत्यधिकम् क. ड. फ. ह. 8. अशिक्षितेन अ.क.ड.फ.ग, अशिक्षितेनापि ह. 9. मे इत्यधिकम् क. इ. फ. 10. यज्ञदत्तेन ड.फ. 11. हि इत्यधिकम् इ. 12. इति इत्यधिकम् फ. 13. सह नास्ति फ. 14. आस्तिका फ. 15. धारय इ. 16. विशेषणम् फ. 17. इतरद्व्यभि° इ. 18. च नास्ति फ. 19. अयं नास्ति फ. 20. अकेन क.इ.फ. 21. पाचकः इ.